दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् मार्गशीर्षशुक्लत्रयोदशी
मार्गशीर्षः १८ प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-41 | 1 | दिसम्बर 03, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 महात्मागान्धीराष्ट्रीयग्रामीणरोजगार गारण्टीयोजनायाः कृते राज्येभ्यः केन्द्रशासितेभ्यः च ६८,३९३.६७ कोटिरूप्यकाणि विमोचितानि

3 HP Vidhan Sabha Session- करुणामूलकजीविकायाः विषये प्रश्नसमये सत्ताधारीपक्षस्य विपक्षस्य च मध्ये उष्णम्- आदानप्रदानम्

4 केंद्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे द्विदिवसीय शोधोपकरणकार्यशाला सम्पन्ना

## मतदातृ-सूच्यां विशेष-गहन-संशोधनस्य (एस्. आई. आर.) विषये निरन्तरं विरोध प्रदर्शनात् लोकसभा दिवसपर्यन्ताय स्थगिता



**हिमसंस्कृतवार्ताः** - अनेकेषु राज्येषु केन्द्रशासितप्रदेशेषु च मतदातृ-सूच्यां विशेष-गहन-संशोधनस्य (एस. आई. आर.) विषये निरन्तरं विरोध प्रदर्शनात् लोकसभा दिवसपर्यन्ताय स्थगिता। विपक्षस्य एस. आई. आर. विषये चर्चायाः आग्रहणानन्तरं, अन्ते दिवसपर्यन्तं स्थगनात् पूर्व सभायां द्वौ स्थगनौ दृष्टौ । राज्यसभापि नियतकार्याणां समाप्तेः अनन्तरं दिनपर्यन्तं स्थगिता। अपराह्णे द्विवादने द्वितीय-स्थगनस्यानन्तरं यदा लोकसभायाः उपवेशनं पुनः आरब्धं तदा विपक्षस्य सदस्याः पुनः मध्ये आगत्य एस्. आई. आर्. विरुद्धम् उद्घोषणं कृतवन्तः। पीठासीन-अधिकारिणः बारम्बारं निवेदनानंतरम् अपि विपक्षेण स्वप्रदर्शनं न स्थगितं, येन सभायाः कार्यमेव दिवसाय स्थगितम्। पूर्व, यदा लोकसभायाः प्रथमस्य स्थगनस्य अनन्तरं मध्याह्न द्वादश वादने सम्मेलनम् अभवत्, तदा काङ्ग्रेस, डी. एम. के., टी. एम. सी. इत्यादि दलानां विपक्षस्य सदस्याः मध्ये आगत्य प्रदर्शनं कृतवन्तः । संसदीयकार्यमन्त्री किरेन रिजिजुः विपक्षीय सदस्यैः सह आग्रहं कृतवान् यत् ते सभायाः कार्येषु विघ्नं न जनयन्तु । सः अवदत् यत् सर्वकारः सभायां कस्यापि विषये चर्चा कर्तुं सज्जः अस्ति। विपक्षस्य प्रदर्शनानन्तरं पीठासीन अधिकारिणा निम्नसदनम् अपराह्णे द्विवादनं यावत् स्थगितम् ।

### राज्यसभायाः अपि स्थगनम्

राज्यसभायां, अपराह्णे द्विवादने प्रथमस्य स्थगनस्य अनन्तरं यदा सभा आरब्धा तदा संसदीयकार्यमन्त्री किरेन रिजिजुः पुनः उक्तवान् यत् निर्वाचन-परिष्कार विषये चर्चार्थं सर्वकारः सज्जः अस्ति इति। सभायां विपक्षस्य नेता मल्लिकार्जुन खड़गे अवदत् यत्, एस.आई. आर. इत्यस्य सप्तषष्ठ्यधिक द्विशत नियमे प्राधान्येन चर्चा कर्तुं शक्यते। अत्रान्तरे, संसदा मणिपुर-वस्तु-सेवा-करः (द्वितीयं संशोधन) विधेयक, विंशति पञ्चविंशति राज्यसभायां चर्चायाः अनन्तरं लोकसभां प्रति प्रत्यर्पितम्। संसदीयकार्यमन्त्री किरेन रिजिजुः अवदत् यत्, अस्मिन् मासे अष्टमे दिनाङ्के राष्ट्रियगीतस्य वंदे मातरम् इत्यस्य सार्धक-शततमे वार्षिकोत्सवस्य अवसरे लोकसभायां विशेष-चर्चा भविष्यति।

## भारतीय-महिला-हॉकीदलस्य मुख्यप्रशिक्षकः हरेन्द्रसिंहः स्वपदात् त्यागपत्रं दत्तवान्



**हिमसंस्कृतवार्ताः** - भारतीयमहिलाहॉकी-दलस्य मुख्यप्रशिक्षिकः हरेन्द्रसिंहः व्यक्तिगतकारणानि उद्धृत्य स्वपदात् त्यागपत्रं दत्तवान् । हरेन्द्रसिंहः अवदत् यत् दलस्य प्रशिक्षणं तस्य कार्यकालस्य महत्त्वपूर्णः क्षणः अभवत्। सः भारतीयहॉकीक्रीडायाः निरन्तरं समर्थनं प्रतिज्ञातवान् । हॉकी-इण्डिया-अध्यक्षः दिलीप तिर्की तस्य सेवायाः धन्यवादं दत्त्वा शीघ्रमेव नूतनप्रशिक्षकस्य घोषणा भविष्यति इति अवदत्। आगामि-क्वालिफायर-क्रीडायाः महिलादलस्य सज्जता योजनानुसारं निरन्तरं भविष्यति इति अधिकारिणः अवदन्। हरेन्द्रसिंहः गतवर्षे जनेके शोपमेन इत्यस्य स्थाने कार्यभारं स्वीकृतवान् आसीत् । सः २०१६ तमे वर्षे कनिष्ठपुरुषदलस्य नेतृत्वं कृत्वा विश्वचषक-उपाधिं प्राप्तवान् । अमेरिका-पुरुषदलस्य प्रशिक्षकः अपि अभवत् । तस्य कार्यकाले भारतेन २०२४ तमे वर्षे एशिया-महिला-चैम्पियस-क्रीडायाः पुरस्कारः प्राप्तः ।

## निर्वाचनायोगेन पश्चिम बङ्गाल-राज्ये शत-प्रतिशत-गणना-प्रपत्राणां प्रस्तुतीकरणविषये विस्तृतं प्रतिवेदनं याचितम्




**हिमसंस्कृतवार्ता** - निर्वाचनायोगेन पश्चिम बङ्गाल राज्यस्य अष्टोत्तरद्विशताधिक विद्वसहस्र बूथ इति केन्द्रेषु शतप्रतिशत-गणना-प्रपत्राणां प्रस्तुतीकरणविषये विस्तृतं प्रतिवेदनं याचितम्। एतेभ्यः केन्द्रेभ्यः किमपि असंकलनीय-पत्राणि न प्राप्तानि, यानि अवास्तविकानि इव दृश्यन्ते इति सः अवोचत्। मण्डल-निर्वाचन-अधिकारिभ्यः स्वस्य प्रतिवेदनानि समर्पयितुं निर्देशः प्रदत्तः आसीत्। भाजपेति दलेन आरोपितं यत् केचन राजनैतिक-प्रेरित-खण्ड-विकास-अधिकारिणः बूथ-स्तरीय अधिकारिणां उपरि स्वस्य ओटिपि-इति संख्याः प्रेषयितुं पीडयन्तः सन्ति, येन मृतानां, स्थानान्तरितानां, अवैध-बाङ्ग्लादेशी-प्रवासिनां च नामानि वर्तमान-एस. आई. आर. प्रक्रियायां समावेशयितुं शक्यन्ते। निर्वाचन आयोगेन नियुक्तः विशेष-अनुक्रमणिका पर्यवेक्षकः सुब्रतगुप्ता, एस्. आई. आर्. प्रक्रियया सम्बद्धाः सङ्कटं परिहर्तुं जनैः, राजनैतिकदलैः, सङ्घटनैः च सह परामर्शं प्रारभत । सी. पी. आई. (एम) तथा काङ्ग्रेस्-दलस्य सदस्याः विशेष-रोल्-अब्जर्वर् इत्यनेन सह मिलित्वा स्वचिन्तां प्रकटितवन्तः ।

## डा. प्रेमकुमारः अष्टादश-तमे बिहारविधानसभायाः नूतनः अध्यक्षः निर्वाचितः

हिमसंस्कृतवार्ता। भाजपेति दलस्य वरिष्ठः नेता डा. प्रेमकुमारः अष्टादश-तमे बिहारविधानसभायाः नूतनः अध्यक्षः निर्वाचितः। प्रोटेम्-स्पीकरः नरेन्द्र-नारायण-यादवः विधानसभायाः सत्रस्य द्वितीये दिने सर्वसम्मत्या निर्वाचनस्य घोषणाम् अकरोत्। सः निर्विरोध निर्वाचितः । उल्लेखनीयम् यत् भाजपेति दलस्य वरिष्ठः नेता डा. प्रेमकुमारः गया-नगर-विधानसभा-क्षेत्रात् नवमवारं विधायकः निर्वाचितः अस्ति। सः पूर्ववर्तीषु अनेकेषु सर्वकारेषु विभिन्नेषु मन्त्रीपदेषु स्थितवान् अस्ति ।

## सुभाषितम्

**ऊषरेषु च क्षेत्रेषु,**
**यथा बीजं हि निष्फलम्।**
**उपकारोऽपि नीचानां,**
**कृतो भवति तादृशः।।**
**-महासुभषितसंग्रह**

भावार्थः- जिस प्रकार एक ऊसर खेत में बीज बोने से कोई फसल प्राप्त नहीं होती है उसी प्रकार नीच व्यक्तियों के प्रति उपकार करने का भी परिणाम वैसा ही होता है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## दुर्बलः भूत्वा दाब-क्षेत्रेण परिवर्तितः चक्रवातः दित्वा

हिमसंस्कृतवार्ता।चक्रवातः दित्वा दुर्बलः भूत्वा दाब-क्षेत्रेण परिवर्तितः अस्ति। दित्वा चक्रवातः दक्षिणपश्चिम बङ्गाल-खात्याः समीपस्थेषु क्षेत्रेषु दक्षिण आन्ध्र प्रदेशस्य तटेषु अस्ति । ऋतु-विभागेन चेन्नई, तिरुवल्लूर, चेङ्गलपट्टु, काञ्चीपुरम् इत्येतेषु मण्डलेषु आगामि चतुर्विंशति होरासु अतिवृष्टेः रेड्-अलर्ट इति रक्त वर्णीया संचेताना प्रसारिता अस्ति। ऋतुविभागेन श्वः पर्यन्तं अस्मिन् प्रदेशे मत्स्य पालन-कार्याणि पूर्णतया अवरोधयितुं निर्देशः प्रदत्तः अस्ति। आपत्-प्रबन्धन केन्द्रेण उक्तं यत् श्रीलङ्का-देशे दित्वा-चक्रवातस्य अनन्तरं व्यापकरूपेण विनाशे मृतकानां सङ्ख्या दशाधिक-चतुःशतं यावत् वर्धिता, अधुनापि षट्त्रिंशोत्तर त्रिशतं यावत् जनाः लुप्ताः

# महात्मागान्धीराष्ट्रीयग्रामीणरोजगारगारण्टीयोजनायाः - मनरेगा इत्यस्याः कृते राज्येभ्यः केन्द्रशासितेभ्यः च ६८,३९३.६७ कोटिरूप्यकाणि विमोचितानि



कृषिमन्त्री शिवराजसिंहचौहानः अवदत् यत् महात्मागान्धीराष्ट्रीयग्रामीणरोजगारगारण्टीयोजनायाः - मनरेगा इत्यस्याः कृते राज्येभ्यः केन्द्रशासितेभ्यः च ६८,३९३.६७ कोटिरूप्यकाणि २०२५-२६ वित्तवर्षे सर्वकारेण विमोचितानि। लोकसभायां प्रश्नस्य उत्तरे सिंहमहोदयः अवदत् यत् वेतनस्य कृते ५७,८५३.६२ लक्षरूप्यकाणि, प्रशासनिककार्यार्थं च प्रायः १०,५४० कोटिरूप्यकाणि विनियोजितानि सन्ति। कृषिमन्त्री उक्तवान् यत् प्रत्यक्षलाभहस्तांतरणप्रोटोकॉलद्वारा सर्वकारः प्रत्यक्षतया लाभार्थीनां खातेषु वेतनं ददाति।

# केन्द्रसर्वकारेण प्राकृतिक- आपदासहाय्यतार्थं पञ्जाबप्रदेशाय ₹240.80 कोटिरूप्यकाणां विमोचनं कृतम्



केन्द्रसर्वकारेण प्राकृतिकविपदायाः निवारणाय राज्यविपदाप्रतिक्रियाकोषात् पञ्जाबप्रदेशाय ₹240.80 कोटिरूप्यकाणि विमोचितानि। गृहराज्यमन्त्री नित्यानन्दरायः लोकसभायां लिखितप्रतिवचनेन एतां सूचनां प्रदत्तवान्। सः अवदत् यत् चलितेवित्तीयवर्षे २०२५-२६ पञ्जाबस्य कृते ₹६४२.४० कोटिरूप्यकाणि आवंटितानि सन्ति। सः अपि अवदत् यत् केन्द्रसर्वकारेण राज्यसर्वकाराय आहत्य ₹४८० कोटिरूप्यकाणां द्वयोः देयकयोः विमोचनं कृतम् अस्ति।

# देवव्रत-महेश-रेखे शुक्ल-यजुर्वेदस्य मध्यान्दिनी-शाखायाः द्विसहस्रमन्त्रयुतं दण्डक्रम-पारायणं कृतवान्



हिमसंस्कृतवार्ताः - शुक्ल-यजुर्वेदस्य मध्यान्दिनी-शाखायाः द्विसहस्रमन्त्रयुतं दण्डक्रम-पारायणं पञ्चाशत् दिनेषु विरामं विनैव सम्पन्नं कर्तुं वेदमूर्तये देवव्रत-महेश-रेखे वर्याय प्रधानमन्त्रिणा नरेन्द्रमोदिना अभिनन्दितम्। सामाजिकान्तर्जालीये सन्देशे श्रीमोदी उक्तवान् यत् ऊनविंशति वर्षीयः वेदमूर्तिदेवव्रत महेशः रेखे यत् कृतवान् तत् आगामि-संततयः स्मरिष्यन्ति ।

# मुख्यमंत्री सुक्खुः धर्मशालायां समृद्धिभवनस्य उद्घाटनं कृतवान्, जनेभ्यः आधुनिकसेवाः उपलब्धाः भविष्यन्ति



**हिमसंस्कृतवार्ताः- धर्मशाला ।** मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः धर्मशालायां २४.४७ कोटिरुप्यकाणां व्ययेन निर्मितस्य समृद्धिभवनस्य उद्घाटनं कृतवान्। एतत् भवनं क्षेत्रस्य जनानां कृते आधुनिकं सुलभं च सेवां प्रदास्यति। भूकम्पक्षेत्रं ५ मनसि कृत्वा, तस्य सुरक्षां सुनिश्चित्य भवनस्य परिकल्पना अत्याधुनिकमूलसंरचनाभिः कृता। २५११ वर्गमीटरक्षेत्रे निर्मितं भवनं भूतलं, चतुर्तलीयं, आधारतलद्वयं च अस्ति। आधारतले ८० वाहनानां कृते पार्किङ्गस्थानं भविष्यति, यत्र कर्मचारिणां सार्वजनिकवाहनानां च कृते निर्दिष्टानि स्थानानि सन्ति। अत्याधुनिकसुविधाभिः सुसज्जिते अस्मिन् भवने धूमविज्ञापकैः सह सुदृढाः अग्निशामकप्रणाल्याः, ५० किलोवाट सौरविद्युत्संस्थानम्, ३०,००० लीटरपरिमितं जलसञ्चयक्षमतायाः वर्षाजलसङ्ग्रहणभण्डारः, डीजीसेट, अन्तःसंचारसुविधाः च सन्ति प्रशासनिकदक्षतायाः, नागरिकसेवानां, स्थायिशासनस्य च अत्याधुनिककेन्द्रत्वेन समृद्धिभवनस्य महत्त्वे बलं दत्त्वा मुख्यमन्त्री उक्तवान् यत् भवनं सामरिकस्थाने स्थितम् अस्ति, धर्मशालायां विविधकार्यं सुगमं करिष्यति। राज्ये नगरीयमूलसंरचनापरियोजनानां कृते अपि एतत् भवनं आदर्शरूपेण कार्यं करिष्यति। अस्मिन्नवसरे विधायकः सुरेशकुमारः, पूर्वसांसद विप्लवठाकुर, धर्मशालायाः महापौर नीनुशर्मा, कांग्रेसनेता देवेन्द्र जग्गी, हिमाचलप्रदेश-ऊर्णमहासंघस्य अध्यक्षः मनोजठाकुरः, एपीएमसी कांगड़ा इत्यस्य अध्यक्षः निशुमोंगरा आदयः गणमान्याः जनाः उपस्थिता अभवन्।

# काशी-तमिल-सङ्गमम् इत्यस्य चतुर्थ-संस्करणम् वाराणस्यां नमोघट्टे समारब्धम्




हिमसंस्कृतवार्ता। काशी-तमिल-सङ्गमम् इत्यस्य चतुर्थ-संस्करणम् उत्तरप्रदेशस्य वाराणस्यां नमोघट्टे समारब्धम् । केन्द्रीय-शिक्षा मन्त्री धर्मेन्द्र-प्रधानः, उत्तरप्रदेशस्य मुख्यमन्त्री योगी-आदित्यनाथः च संयुक्तरूपेण अस्य कार्यक्रमस्य उद्घाटनं कृतवन्तौ, यस्य उद्देश्यं उत्तर-दक्षिणयोः मध्ये सम्बन्धान् सुदृढं कर्तुम् अस्ति । अस्मिन् वर्षे कार्यक्रमस्य विषयः 'लेट्स लर्न तमिळ ऑर तमिल कर्कलम्' इति अस्ति। गत रविवासरे स्वस्य 'मन की बात' इत्यस्मिन् कार्यक्रमे प्रधानमन्त्री उक्तवान् यत्, काशी-तमिल-सङ्गमम् इतीदं तमिळ भाषया सम्बद्धानां सर्वेषां कृते महत्त्वपूर्णं मञ्चः अभवदिति । प्रधानमन्त्री नरेन्द्रमोदी काशी-तमिळ सङ्गमम् इत्यस्य आरम्भाय शुभाशयाः प्रेषितवान्। सामाजिकान्तर्जालीये सन्देशे श्रीमोदी उक्तवान् यत् अयं जीवन्तः कार्यक्रमः एकभारत, श्रेष्ठभारत इत्यस्य भावं सुदृढं करोति इति । कार्यक्रमावधौ नागरिकाणां काशी-वासः चिरस्मरणीयवासः भवेदिती प्रधानमन्त्रिणा प्रार्थितम्।

# विद्युतमित्रस्य पशुमित्रस्य च नियुक्तिः आरब्धा ; बोर्डविभागाश्च स्वयमेव सम्पन्नं करिष्यन्ति चयनप्रक्रियाम्

हिमसंस्कृतवार्ता। राज्यसर्वकारात् अनुमतिं प्राप्य विद्युत् बोर्डे विद्युत उपभोक्ता मित्र (विद्युत् उपभोक्तृमित्र) तथा पशुपालनविभागे पशुमित्र (पशु मित्र) इत्येतेषां पदानां नियुक्तिप्रक्रिया प्रारब्धा। राज्यविद्युत्मण्डलेन पशुपालनविभागेन च अस्मिन् विषये पत्रं अधिसूचितमस्ति। बोर्डविभागश्च नियुक्तयः स्वतन्त्रतया करिष्यति। ५०० पशुमित्रपदानां, १,६०२ विद्युतमित्रपदानां नियुक्तिः भविष्यति। हिमाचलप्रदेशसर्वकारेण पशुपालनविभागे ५०० पशुमित्रपदानां नियुक्तेः अनुमोदनं कृतम्। अस्मिन् विषये विभागेन सर्वेभ्यः संयुक्तनिदेशकेभ्यः नियन्त्रकपदाधिकारिभ्यः च निर्देशाः प्रेषिताः। पशुमित्रनीतिः २०२५ इति सर्वकारेण २०२५ तमस्य वर्षस्य अगस्तमासस्य १४ दिनाङ्के कार्यान्विता, यस्याः अन्तर्गतं बहुकार्यसहायकानां (पशुमित्राणां) नियुक्तिः कर्तव्या अस्ति। अधुना २०२५ तमस्य वर्षस्य नवम्बर्-मासस्य २८ दिनाङ्के निर्गतस्य पत्रस्य माध्यमेन सर्वकारेण विभागाय आहत्य ५०० पशुमित्र-पदानां नियुक्तेः अनुमतिः प्रदत्ता अस्ति । एतेन सह एतानि पशुमित्राणि यत्र नियोजितानि भविष्यन्ति, तेषां पशुसंस्थानां सूची अपि मण्डलानुसारं उपविभागानुसारं च प्रेषिता अस्ति।

# HP Vidhan Sabha Session- करुणामूलकजीविकाया: विषये प्रश्नसमये सत्ताधारीपक्षस्य विपक्षस्य च मध्ये उष्णम्- आदानप्रदानम्



**हिमसंस्कृतवार्ता:- धर्मशाला।** हिमाचलप्रदेश-विधानसभा- शीतकालीनसत्रे करुणामूलकजीविकाया: विषये मंगलवासरे प्रश्नसमये सत्ताधारीपक्षस्य विपक्षस्य च मध्ये उष्णम् आदानप्रदानं जातम्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः विपक्षस्य नेता जयरामठाकुरः च अस्मिन् विषये अनेकवारं द्वन्द्वं कृतवन्तौ। मुख्यमन्त्री उक्तवान् यत् पूर्वसर्वकारेण करुणामूलकवर्गस्य कृते किमपि न कृतम्, अधुना सदने राजनीतिः क्रीड्यते इति। राज्यसर्वकारेण आयसीमा २.५ लक्षरूप्यकात् ३ लक्षरूप्यकाणि यावत् वर्धिता आसीत्। अस्य आधारेण ३१ दिसम्बर् यावत् प्राप्तप्रस्तावानां कृते कार्यप्रदानस्य प्राथमिकता भविष्यति। नववर्षे एव नियुक्तिप्रक्रिया आरभ्यते। मुख्यमन्त्री उक्तवान् यत् लम्बितप्रकरणानाम् विषये पश्चात् विचारः भविष्यति। विपक्षस्य नेता मुख्यमंत्रिणः वचनम् अशुद्धम् इति वदन् प्रतिवदति स्म। पूर्वसर्वकारे सर्वाधिकं करुणामूलकजीविकानुदानं दृष्टम्। भाजपाविधायकः दीपराजः एषः विषयः उत्थापितवान् यत् आयसीमा २.५ लक्षरूप्यकाणां कारणात् सर्वकारेण करुणापूर्णजीविकाया: २५५४ आवेदनानि अङ्गीकृतानि। अधुना आयसीमा ३ लक्षरूप्यकाणि यावत् वर्धिता अस्ति, अतः एतेषां प्रकरणानाम् अपि विचारः करणीयः। विधायक आशीष बुटैलः उक्तवान् यत् पालमपुरस्य कृषिविश्वविद्यालये करुणाकारणात् कार्याणि न दीयन्ते। १९८८ तमस्य वर्षस्य प्रकरणाः अद्यापि लम्बिताः सन्ति। विधायक रणधीरः शर्मा इत्यनेन उक्तं यत् अस्वीकृतप्रकरणेषु प्रथमं विचारः करणीयः। जयरामः उक्तवान् यत् पूर्ववर्ती- वर्तमानसर्वकारेषु दत्तानां कार्याणां संख्यायाः अभिलेखः सदने एव स्थापनीयः। तस्य प्रतिक्रियारूपेण मुख्यमन्त्री उक्तवान् यत् सर्वकारेण अस्मिन् नियुक्तिप्रक्रियायां तृतीयवर्गस्य अपि समावेशः कृतः। यथा यथा रिक्तस्थानानि उत्पद्यन्ते तथा तथा ते पूरिताः भविष्यन्ति। नीतयः निरन्तरं परिवर्तन्ते। मृतानाम् अनुबन्धानाम् आश्रितानां, दैनिकवेतनकर्मचारिणां च वर्तमानसर्वकारनीत्याधारितं जीविकां प्रदातुं प्रावधानं वर्तते।

## सुक्खुः अवदत्- "मा क्रुद्धः भवतु, विपक्षस्य नेता।"

जयरामः अवदत्, "अहं किमपि दोषं श्रोतुं न शक्नोमि।" प्रश्नसमये मुख्यमन्त्री उक्तवान् यत् विपक्षस्य नेता सर्वेषु विषयेषु क्रुद्धः न भवेत्, स्वस्य स्वाभाविकावस्थायां एव तिष्ठेत्। सः अवदत् यत् विपक्षे उपविष्टः जयरामठाकुरं कष्टं जनयति। जयरामठाकुरः प्रतिवचनं दत्तवान् यत्, "अहं स्वाभाविकतया शान्तः अस्मि, परन्तु सदने मिथ्यासूचनाः प्रस्तुताः भवन्ति इति अहं सोढुं न शक्नोमि" इति।

## प्रश्नानाम् उत्तराणि न प्राप्यन्ते इति विषये विपक्षः आक्षेपं प्रकटितवान्

भाजपाविधायकाः आपत्तिं कृतवन्तः यत् केवलं केषाञ्चन प्रश्नानां सम्बद्धा सूचना एव संगृहीता अस्ति। भाजपाविधायकः जीतरामकटवालः विपक्षनेता च पृष्टवन्तौ यत् विगतत्रिवर्षेषु विभागेषु कति पदानि पूरितानि इति। तस्य प्रतिक्रियारूपेण मुख्यमन्त्री अवदत् यत् सूचना विस्तृता अस्ति, अतः, तस्याः संग्रहणार्थं समयः भवति। सूचनासङ्ग्रहस्य व्यवस्था पूर्वसर्वकाराद् एव प्रचलति। वयं प्रणालीं परिवर्त्य अग्रिमे सत्रे उत्तरं दास्यामः। जयरामठाकुरः प्रतिवदति स्म यत् एषः प्रश्नः पूर्वसत्रे एव उत्थापितः, तदा अपि सूचनाः संगृह्यन्ते, प्रतिक्रिया च न प्राप्ता। सः अवदत् यत् काङ्ग्रेस-सर्वकारेण राज्यस्य युनां भविष्येन क्रीडा कृता अस्ति। यदा अन्यः प्रश्नः अपि अनुत्तरितः अभवत् तदा विधायकः जीतरामकटवालः अवदत् यत् एषः सूचनासङ्ग्रहविषये प्रश्नः नास्ति। सर्वकारेण वा कार्याणि न प्रदत्तानि वा अतिशयेन कार्याणि प्रदत्तानि वा। एषा सूचना उपलब्धा भवेत्।

# मुख्यमंत्री सुक्खुः बाणगंगाघाटस्य उदघाटनं कृत्वा सायंकालीन-अर्चनायां भागं गृहीतवान्



**हिमसंस्कृतवार्ताः - काङ्गड़ा।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः काङ्गड़ायां नवनिर्मितस्य बाणगंगाघाटस्य उद्घाटनं कृत्वा हरिद्वारस्य आदर्शरूपेण मन्त्रजापस्य मध्यं सायंकालीनाम् आरार्तिक्यं प्रारब्धवान्। नित्य- आरती सहस्राणां भक्तानां कृते विशेष आकर्षणं भविष्यति। ₹२.२० कोटिरूप्यकाणां व्ययेन निर्मितस्य घाटस्य निर्माणे कैप्टन-शैलेशरियालच- फाउंडेशन इत्यस्य महती भूमिका आसीत्। संस्थया प्रायः ₹१.५ कोटिरूप्यकाणि व्ययितानि, काङ्गड़ाजिल्लाप्रशासनेन तु प्रायः ₹७० लक्षरूप्यकाणि प्रदत्तानि। कप्तानः शैलेशः नगरोटाबागवांक्षेत्रस्य अम्बाड़ीक्षेत्रस्य आसीत्। सः प्रायः २५ वर्षाणि पूर्वं शहीदः अभवत्, तस्य स्मृतौ च फाउण्डेशनेन घाटस्य निर्माणे प्रमुखा भूमिका अस्ति। घाटसङ्कुलस्य २५ पादपरिमितं त्रिशूलं स्थाप्यते। भक्तानां पर्यटकानां च सुविधायै भव्यं आरतीस्थलं, परिवर्तनकक्षशः, शौचालयः, आकर्षकं मञ्चं, सुन्दरोद्यानं, उन्नतप्रकाशः च विकसिताः सन्ति। सायं आरार्तिक्येन सह योगसत्र, विविधाः धार्मिक-सांस्कृतिकाः कार्यक्रमाः अपि अत्र आयोज्यन्ते। मुख्यमन्त्री उक्तवान् यत् हिमाचलप्रदेशः देवभूमिः अस्ति तथा च काङ्गड़ानगरस्य बज्रेश्वरीमन्दिरं देशस्य सर्वेभ्यः देशेभ्यः आगच्छन्तानाम् सहस्राणां भक्तानाम् आस्थायाः केन्द्रम् अस्ति। भक्ताः अपि घाटे स्नानं कुर्वन्ति, अतः तेषां सुविधां मनसि कृत्वा स्नानस्य, पूजायाः च सुव्यवस्थितं सुरक्षितं च स्थानं प्रदातुम् अयं घाटः विकसितः अस्ति।

# मादकद्रव्यस्य दुरुपयोगद्वारा प्राप्ताः सम्पत्तयः सर्वकारः ध्वस्तं करिष्यति; मुख्यमंत्री सुक्खुः १० दिसम्बरपर्यन्तं विवरणं याचितवान्

**हिमसंस्कृतवार्ताः- धर्मशाला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः काङ्गड़ामण्डलस्य धर्मशालायां मादकद्रव्यसमन्वयकेन्द्रस्य षष्ठाया: राज्यस्तरीयसभायाः अध्यक्षतां कुर्वन् राज्यसर्वकाराय निर्देशं दत्तवान् यत् राज्यात् चिट्टा इत्यादीनि सर्वाणि मादकद्रव्याणि पूर्णतया समाप्तुं मादकद्रव्याणां दुरुपयोगविरुद्धं प्रचलति अभियानं अधिकं त्वरितं कुर्वन्तु। सम्बन्धित-राज्यसर्वकार- विभागानाम् अतिरिक्तं एनसीबी, ईडी, डीआरआई, डाकविभाग, आरपीएफ इत्यादीनां केन्द्रीयसंस्थानां प्रतिनिधिभिः अपि भागः गृहीतः।मुख्यमन्त्री उक्तवान् यत् राज्यस्य २३४ अत्यन्तं संवेदनशीलपञ्चायतेषु सीआईडी, पुलिसबलयोः विशेषनियोजनं कृतम् अस्ति। उपायुक्तान् एतेषु पंचायतेषु मादकद्रव्यनिवारणसमितीनां स्थापनां कर्तुं निर्देशं दत्तवान्। सः मादकद्रव्यसमन्वयकेन्द्रं प्रत्येकस्मिन् मण्डले नियमितसमागमं कर्तुं निर्देशमपि दत्तवान्। सः युनाम्, अभिभावकानां, पंचायतीराजसंस्थानां, महिलासङ्घटनानाम्, अन्येषां स्वैच्छिकसंस्थानां च प्रतिनिधिभ्यः आह्वानं कृतवान् यत् ते राज्यं मादकद्रव्यमुक्तं कर्तुं सक्रियभूमिकां निर्वहन्तु। मुख्यमंत्री सर्वेषां जिलाप्रशासनानां कृते निर्देशं दत्तवान् यत् ते मादकद्रव्याणां दुरुपयोगद्वारा प्राप्तानां सम्पत्तिनां पराचयं कृत्वा १० दिसम्बरपर्यन्तं सर्वकाराय प्रतिवेदनं प्रस्तूयताम्। राज्यसर्वकारेण एताः सम्पत्तयः ध्वस्तं भविष्यति इति सः अवदत्। मुख्यमन्त्री उक्तवान् यत् १५ पुलिसाधिकारिभिः सहितं ६०



सर्वकारीयकर्मचारिणः मादकद्रव्यव्यापारे संलग्नाः दृश्यन्ते। एतेषु पञ्च निष्कासिताः, अन्येषां विरुद्धं वैधानिकी कार्यविधिः क्रियते इति सः अवदत्। मादकद्रव्यव्यापारे सम्बद्धानां सर्वकारीयकर्मचारिणां विवरणं १० दिसम्बर् यावत् प्रस्तूयताम् इति अपि सः सर्वकाराय निर्देशं दत्तवान्। सः अवदत् यत् भविष्ये मण्डले उपविभागस्तरस्य च मादकद्रव्यविरोधी वाकथॉनस्य आयोजनं भविष्यति।मुख्यमन्त्री उक्तवान् यत् सर्वकारः न केवलं राज्ये कठोरप्रवर्तनं सुनिश्चितं करोति अपितु मादकद्रव्यव्यसनिनः कृते परामर्शं, चिकित्सा, पुनर्वासतन्त्रं च सुदृढं करोति। राज्ये सर्वकारीयनियुक्तिषु औषधपरीक्षणम् अनिवार्यं कृतम् इति सः अवदत्। सः अवदत् यत् विद्यालयेषु महाविद्यालयेषु च मादकद्रव्यविरोधी क्लब, प्रहरी क्लब, सहपाठिनां शिक्षाकार्यक्रमाः च अधिकं सक्रियताम् अवाप्तवन्तः। राज्ये विजयायाः कृषिविषये कठोरनिरीक्षणं क्रियते। औषध- एककेषु कठोरनिरीक्षणं क्रियते इति सः अवदत्। एनडीपीएस-प्रकरणेषु अपीलनिस्तारणं शीघ्रं कर्तुं, निर्दोषतायाः समीक्षां कर्तुं, दोषीत्वस्य दरं वर्धयितुं च अभियोजननिदेशालयं निर्देशितवान्। सः अवदत् यत् औषध-नियन्त्रणसम्बद्धाः आपूर्तिः, याचना, हानिनिवारणं च सम्बद्धाः मानकाः अधुना अधिकारिणां एसीआर-मध्ये समाविष्टाः भविष्यन्ति।

# केंद्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे द्विदिवसीय शोधोपकरणकार्यशाला सम्पन्ना



**हिमसंस्कृतवार्ताः-प्रवेशकुमारशुक्लः, भोपालम्**

केंद्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे आयोजित-द्विदिवसीय शोधोपकरणकार्यशालायाः उद्घाटनसत्रे शोधोपकरणानां प्रासंगिकता, आवश्यक्ता च विषये एकः सारगर्भित- प्रभावशालीविमर्शः सम्पन्नः। कार्यक्रमस्य शुभारम्भः शक्तिगौतम्या लौकिकमङ्गलाचरणेन कृता। ततः परं कार्यक्रमस्य संचालनं आशुतोषद्विवेदिना सुशोभनरूपेण निरूहितम्। प्रास्ताविकवक्तव्यं प्रो. गोविन्दकुमारपाण्डेयैः प्रदत्तम्। ते अवदन्- "अद्यतनयुगे शोधः तदा एव फलप्रदः मन्यते यदा शोधार्थिनः उपकरणप्रयोगे निपुणाः सन्ति तथा तैः प्राप्तस्याङ्कनस्य वैज्ञानिकविश्लेषणं शास्त्रानुसारं कर्तुं शक्यते।" कार्यक्रमस्याध्यक्षत्वं परिसरनिर्देशकैः प्रो. हंसधरझामहोदयैः कृतम्। मुख्यवक्तारूपेण उपस्थिताः प्रो. रमेशप्रसादपाठकः (पूर्वविभाध्यक्षः) शोधोपकरणानां बहुवार्तात्मकमहत्त्वम् विस्तरेण प्रकाशयन् अवदन्- "समुचितोपकरणचयनेन एव शोधस्य दिशानिर्धारणं भवति। उपकरणानि यत् अधिकं विश्वसनीयानि भवन्ति, तत्र निष्कर्षाः तत् अधिकं प्रमाणिकाः भविष्यन्ति।" ते अपि उक्तवन्तः यत् आधुनिके अनुसन्धानकर्मणि केवलं विषयज्ञानं न पर्याप्तम्, अपितु उपकरणस्य सम्यक् उपयोगः, सांख्यिकीयपद्धतयः, तथा दत्तांशव्याख्यानदक्षता च अत्यन्तावश्यकाः सन्ति।विशेषवक्तारूपेण डॉ. दातारामपाठकः (सहायकाचार्यः, शिक्षाशास्त्रविभागः, नासिकपरिसरः) अवदत्- "शोधोपकरणानि अनुसन्धानं वैज्ञानिकरूपेण समृद्धयन्ति उपकरणसहाय्येन संशोधकाः समस्यासु वस्तुनिष्ठतया, माप्यतया, तर्कसंगततया च अवगन्तुं शक्नुवन्ति।" कार्यक्रमे संयोजकत्वे नितिनकुमारजैनः, डॉ. रजनी वी. जी., डॉ. गोविन्दसरकारश्च सक्रियतया नियोजिताः आसन्। विभागीयवरिष्ठाचार्येषु प्रो. सोमनाथसाहु, प्रो. अशोककुमारकच्छवाह, डॉ. प्रदीपकुमारजोशी, डॉ. कृष्णकान्ततिवारी, डॉ. एस. कृष्णाप्रभृतयाः विद्वांसः उपस्थिताः आसन्, येषां सान्निध्येन कार्यक्रमस्य गरिमा वर्धिता। उद्घाटनसत्रस्य समापनकाले अनमोलझा धन्यवादप्रवचनम् उपस्थापितम्। सः सर्वेभ्यः विद्वद्भ्यः, आयोजकभ्यः, सहभागिभ्यः च कृतज्ञतां प्रदायभणितं यत् एतादृशाः शैक्षिकगतिविधयः शोधार्थिभ्यः महान् प्रेरणास्रोतः भवन्ति।

# नीमच-नगरे 1100 छात्रैः

## श्रीमद्भगवद्गीतायाः पंचदशाध्यायस्य भव्यः सामूहिकः सस्वरः पाठः सम्पन्नः





**वार्ताहरः - जगदीश डाभी**

नीमचम् | 1 दिसम्बरमासस्यअंतरराष्ट्रीय-गीता-जयन्ती-महोत्सवस्य पावनावसरे नीमच-नगरे 1100 अधिकैः छात्रैः छात्राभिश्च श्रीमद्भगवद्गीतायाः पंचदशाध्यायस्य "पुरुषोत्तमयोगः" सामूहिकः सस्वरेण पाठः कृतः।

अनेन दिव्य-आयोजनेन सम्पूर्णं नगरं गीता-ध्वनिना आध्यात्मिक-ऊर्जया च परिपूरितम्।

अयं कार्यक्रमः माननीय-मुख्यमंत्री डॉ. मोहन-यादव-महोदयानां आह्वानेन तथा महर्षि-पतञ्जलि-संस्कृत-संस्थानस्य निर्देशानुसारं प्रदेशव्यापी रूपेण सम्पन्नः, यस्मिन् 313 विकासखण्डेषु, 55 जिला-मुख्यालयेषु, 10 संभागेषु च 3 लक्षाधिकैः गीता-प्रेमिभिः सामूहिकः सस्वरः पाठः कृतः।नीमच-कार्यक्रमस्य शुभारम्भः सरस्वती-पूजया, गीता-पूजया तथा शंखनादेन (श्रीशंकर-शुक्ल-महोदयेन) अभवत्। ततः स्वस्तिवाचनम्, गुरु-वन्दना, प्रेरणा-गीतस्य सस्वर-गायनम्सांदीपनि-विद्यालयस्य शिक्षिका ऋतु-शर्मा-महोदया एवं छात्रैः प्रस्तुतम्। व्यासपीठे आचार्य-दिग्विजय-पालीवाल-महोदयस्य मार्गदर्शनेनश्रीमद्भगवद्गीतायाः पंचदशाध्यायस्य सामूहिकः सस्वरः पाठः, अनुगायनं तथा भावार्थः सम्पन्नः।कार्यक्रमस्य अन्ते भव्य-गीता-आरती सम्पन्ना, पश्चात् सर्वेभ्यः श्रद्धालुभ्यः प्रसाद-वितरणं कृतम्।अस्मिन्नेव अवसरे भगवतः श्रीकृष्णस्य जीवनाधारितानां 94 दुर्लभ-चित्राणाम् भव्य-प्रदर्शनी अपि आयोजिताऽभवत्।

### अस्मिन्जिला-स्तरीय-महोत्सवे प्रमुखतया उपस्थिताः

माननीयजिलाधीशः श्रीहिमांशुचन्द्रा, माननीयमुख्यकार्यपालन-अधिकारी-जिला-पंचायतः श्रीअमनवैष्णवः, भाजपा-जिला-अध्यक्षा श्रीमतीवंदनाखंडेलवालः, विधायकप्रतिनिधि श्रीमतीमीनाजायसवालः, विश्व-गीता-प्रतिष्ठानस्य जिलासंयोजकः श्रीविपिनपुरोहितः, जिलाशिक्षा-अधिकारी श्रीसुजानमलमांगरिया, जिलापरियोजनासमन्वयकः श्रीदिलीपव्यासः, जिलासहपरियोजनासमन्वयकः श्रीप्रलयोपाध्यायः, प्राचार्यः श्रीज्ञानवर्धनश्रीवास्तवः, उत्कृष्टप्राचार्यः श्रीअनिलकुमारव्यासः च नैकाः शिक्षकगणाः!

प्रदेशस्तरे आयोजितायां ऑनलाइन-गीता-ज्ञान-प्रतियोगितायाम् 88,100 परीक्षार्थिभिः सहभागिता कृता। माननीय-मुख्यमंत्री डॉ. मोहन यादव-महोदयः अवदत् "गीता कर्मवादं, कर्तव्यपथं, आत्मबलं च शिक्षयति। जीवनस्य सर्वेषां प्रश्नानां समाधानं गीतायामेव अस्ति।"नीमच-नगरे सम्पन्नः अयं कार्यक्रमः केवलं धार्मिकः न, अपि तु नव-पीढ्यां संस्कारः, नैतिकतायाः, कर्तव्यबोधं च स्थापितुं महतीं प्रेरणां अभवत्।

# नागपुरे अनुप्रयुक्तरत्नविज्ञाने 21 दिवसीयकार्यशालायाः उद्घाटनम्




**हिमसंस्कृतवार्ताः- नागपुरम्।**

कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयस्य अभिनवभारतीवारङ्गपरिसरद्वारा आयोजितायाः २१ दिवसीयायाः अनुप्रयुक्तरत्नविज्ञानस्य कार्यशालायाः उद्घाटनं नागपुरनगरस्य उत्कर्षविदर्भहिन्दीसाहित्यसम्मेलने अभवत्। वारंगा परिसरस्य निदेशकः कार्यक्रमस्य समन्वयकः च प्राध्यापकः कृष्णकुमारपाण्डेयः कार्यशालायाः उद्देश्यं शैक्षिकं महत्त्वं च प्रकाशयन् स्वागतभाषणं कृतवान्। अस्याः कार्यशालायाः केन्द्रीयसंस्कृतविश्वविद्यालयात् आर्थिकानुदानं प्राप्तम्। विश्वविद्यालयस्य संस्थापकः कुलपतिः डॉ. पंकजचांदे मुख्यातिथिरूपेण उपस्थितः आसीत्। सः रत्नशास्त्रस्य, जातशास्त्रस्य च महत्त्वस्य विषये स्वस्य अन्वेषणात्मकान् अनुभवान् प्रकटितवान्। कार्यक्रमस्य अध्यक्षता कार्यवाहककुलपतिः डॉ. अतुलवैद्यः अकरोत्, येन रत्नानाम् वैज्ञानिकपक्षेषु, रत्नविज्ञानस्य सामाजिकलाभेषु च विशेषं बलं दत्तम्। वास्तुशास्त्रविभागाध्यक्ष प्रो. प्रसाद गोखले धन्यवादज्ञापनं कृतवान्। कार्यक्रमस्य संचालनं डॉ. अम्बालिका सेठिया, अनवेशदेवलापल्ली महोदयेन शान्तिमन्त्रस्य पाठः कृतः। विश्वविद्यालयस्य प्राध्यापकाः, छात्राः, कार्यशालायाः सहभागिनः च बहुसंख्यायाम् उपस्थिताः आसन्।

## वार्ता-संवादः

**नन्दिनीः-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्याः** नमस्ते नन्दिनि। अद्य मया एका अद्भूता वार्ता पठिता। कृषि-क्षेत्रे नूतन-प्रविधिना समुद्र-तृणस्य उत्पादन-व्ययः पञ्चाशीति-प्रतिशतं यावत् न्यूनीकृतः।

**नन्दिनीः-** एतत् तु कृषकेभ्यः महान् लाभः। परं मया अपरा चिन्ताजनिका वार्ता अपि श्रुता। कृत्रिम-बुद्ध्या वन्य-पशूनां बहूनि कूट-चलचित्राणि निर्मितानि।

**काव्याः-** कूट-चलचित्राणि इति? तैः जनाः वञ्चिताः जाताः वा?

**नन्दिनीः-:** आम्। लक्षाधिकैः जनैः तानि सत्यानि इति स्वीकृतानि। अनेन शोधेन ज्ञायते यत् वास्तविक-प्राणिनः सङ्कटे पातिताः।

**काव्याः-**सा वञ्चना तु अनुचिता। किन्तु अद्य मया जीव-सृष्टेः विषये काचित् शुभा वार्ता प्राप्ता। वैज्ञानिकैः ज्ञातं यत् पृथिव्याः प्राचीन-वायुमण्डलेन एव जीवनस्य आरम्भः कृतः।

**नन्दिनीः-** एतत् तु आश्चर्यकरम्। तत्र गन्धक-युक्ताः अंशाः अभूवन् वा?

**काव्याः-**आम्, तैः वायुभिः एव गन्धक-युक्ताः जीव-रसायनाः स्वयमेव रचिताः।

**नन्दिनीः-** तत् तु गहनं ज्ञानम्। अधुना चिकित्सा-क्षेत्रे अपि एका नूतना सिद्धिः लब्धा। मूषकानां मस्तिष्क-अर्बुदाः केवलं नासिका-बिन्दुभिः नाशिताः।

**काव्याः-** शल्य-क्रिया विना एव? एतत् तु अविश्वसनीयम्।

**नन्दिनीः-** सत्यम्। तैः सूक्ष्म-बिन्दुभिः रोगः पूर्णतया निवारितः। इदानीं मानवानां कृते अपि आशा वर्धते।

**काव्याः-** एताः सर्वाः वार्ताः अतीव महत्त्वपूर्णाः। अद्यतन-कार्यक्रमः अत्रैव समाप्तः।

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**